# संस्कृतवार्ता:

दिनाङ्क :- 29.05.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य पश्चिमबङ्गालस्य अलीपुरद्वार-कूचबिहार-जनपदयोः नगराधारित-वातीन्धन-वितरण-परियोजनायाः उद्घाटनम् अकरोत्। अवदत् च यत् बङ्गालस्य विकासः देशस्य भविष्यम् इति।
- बहुदलीय-संसदीय-प्रतिनिधिमण्डलम् आतङ्कवादस्य उन्मूलनाय भारतस्य दृढनिर्णयं विश्वनेतृन् ज्ञापयति।
- भारतीय-रिजर्व-बैङ्केन ऐषमो वित्तवर्षे भारतस्य तीव्रतया समेधमानार्थ-व्यवस्थाया: लक्ष्यम् अनुमानितम्।
- सिंगापुर-ओपन-बैडमिंटन-प्रतिस्पर्धायां भारतस्य सात्विक-साईराज-रेंक्कीरेड्डी, चिराग-शेट्टी इत्यनयो: दलं पुरुष-युगल-वर्गस्य प्रागुपान्त्य-चक्रे प्रविष्टम् ।
- आई.पी.एल्. क्रिकेट्-प्रतिस्पर्धायाम् निर्णायक-चक्रे अर्हतायै प्रथम-स्पर्धायाम् अद्य रॉयल-चैलंजर्स-बैंगलूरु-दलस्य सामुख्यं पञ्जाब-किंग्स्-दलेन समम् भविष्यति। ।

---------------------------------------------------

प्रधानमन्त्री पश्चिमबङ्गाले

प्रधानमन्त्री नरेन्द्रमोदी अद्य पश्चिमबङ्गालस्य अलीपुरद्वार-जनपदस्य अलीपुरद्वार परेड ग्राउंड इति पथ-संचलनोद्याने नगराधारित-वातीन्धन-वितरण-परियोजनायाः उद्घाटनं कृतवान्। सप्तदशोत्तरैक- सहस्र-कोटि-रूप्यकाणां परियोजनायाः लाभः पश्चिमबङ्गस्य अलीपुरद्वार-कूचबिहार-जनपदयोः जनानां कृते भविष्यति । कार्यक्रमे प्रवदन् प्रधानमन्त्रिणा उक्तं यत् भारतीयार्थव्यवस्था वातीन्धनाधारितार्थ-व्यवस्थायाः दिशि गच्छति। गृहेषु वातीन्धन-कूपिकानाम् आवश्यकता न भविष्यति। पाकशालायां एल.पी.जी. वातीन्धनस्य

वितरणं नालिकाभिः प्रत्यक्षतया भविष्यति। भविष्ये पर्यावरण-प्रदूषणं न्यूनं भविष्यति इति प्रधानमन्त्रिणा उक्तम्।

श्री-मोदी अद्य पटनायां जयप्रकाश-नारायण अन्ताराष्ट्रिय-विमानपत्तने नूतन-टर्मिनल-बिल्डिंग इत्येतस्य उद्घाटनम् अकरोत्। सममेव प्रधानमन्त्रिणा नरेन्द्रमोदिना बिहता विमानपत्तने दशाधिक-चतुर्दश-शतकोटि-रुप्यकाणां परियोजनाया: आधारशिला अपि स्थापिता। अत्रावसरे बिहारस्य राज्यपाल: आरिफ-मोहम्मद-खान: मुख्यमन्त्री-नितिश-कुमार: नागर-विमानन-मन्त्री के-राम-मोहन-नायडू अपि उपस्थिता: आसन्।

इतः पूर्वं प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् सिक्किमराज्यम् सम्पूर्णं पूर्वोत्तरक्षेत्रं च भारतस्य प्रगतेः एकं देदीप्यमानाध्यायरूपेण उद्भवति । अद्य आभासीय-माध्यमेन सिक्किम @50 इति कार्यक्रमं सम्बोधयन् प्रधानमन्त्रिणा प्रतिपादितं यत् केन्द्रं सिक्किमस्य विकासे पूर्णतया समर्थनं करोति। सः अवदत् यत् सिक्किम-राज्यं वैश्विक-पर्यटन-स्थलं भवितुम् अर्हति । स्वस्य समावेशी-विकास-कार्यक्रमस्य पुनः पुष्टिं कुर्वन् प्रधानमन्त्री अवदत् यत् "चतुर्दशोत्तर-द्वि-सहस्र-तमे वर्षे वयं 'सबका साथ, सबकाविकास ' इति उद्घोषं कृतवन्तः। सः अवदत् यत्, भारतं 'विकसितुम्' कर्तुं राष्ट्रस्य प्रत्येकस्य राज्यस्य क्षेत्रस्य च सन्तुलित-विकासः करणीयः।

श्रीमोदी अवदत्, भारतस्य प्रत्येकस्य राज्यस्य क्षेत्रस्य च स्वकीया विशेषता अस्ति। अतः अस्माकं सर्वकारेण पूर्वोत्तरं विकासस्य केन्द्रे आनीतम्।

प्रधानमन्त्रिणा सिक्किमराज्ये आभासीय-माध्यमेन आधारशिलास्थापनानन्तरम् अनेकासां विकासपरियोजनानां लोकार्पणं कृतम्। परियोजनासु नामची-मण्डले सार्द्ध-सप्त-शत-कोटिरूप्यकाणां मूल्यात्मकस्य नूतनः पञ्चशत-शय्यायुक्तं मण्डलीय चिकित्सालयः, संगाचोलिंग् इत्यत्र यात्रीरज्जुमार्गः च अन्तर्भवति।

---

<u>राजनाथसिंहः सीआईआई</u>

रक्षामन्त्रिणा राजनाथसिंहेन उक्तं यत् मेक-इन-इण्डिया इति राष्ट्रियसुरक्षायाम् अत्यावश्यकः घटकः अस्ति। अथ च सिन्दूराभियानावधौ आतङ्कवादं विरुध्य भारतस्य प्रभावी कार्याचरणे प्रमुखा भूमिका आसीत्। नवदिल्ल्यां सी.आई.आई. इति वार्षिक-व्यापार-शिखरसम्मेलनं सम्बोधयन् श्रीसिंहः अवदत् यत् भारतेन आतङ्कवादं विरुध्य स्वस्य रणनीतिः प्रतिक्रिया च द्वयोः अपि पुनः परिकल्पना कृता, पुनः परिभाषिते च।

रक्षामन्त्री स्पष्टं कृतवान् यत् इदानीं यदा कदापि पाकिस्तानेन सह वार्ता भविष्यति तदा केवलं आतङ्कवाद-विषये पाकिस्तानाधिकृत-कश्मीरविषये एव चर्चा भविष्यति।

-------------------------------------------------

बहुदलीप्रतिनिधियः

आतङ्कवादस्य उन्मूलनाय भारतस्य दृढसमर्पणस्य प्रदर्शनरूपेण सप्त-बहुदलीय-संसदीय-प्रतिनिधिमण्डलानि विदेशेषु आधिकारिक-यात्रासु उच्च-स्तरीय-विमर्शेषु च संलग्नाः सन्ति। रोमनगरे भाजपेति दलस्य सांसदः रविशंकर-प्रसादस्य नेतृत्वे प्रतिनिधिमण्डलेन सिनेट्-समित्याः विदेश-कार्याणां रक्षासमितेः अध्यक्षया स्टेफेनिया क्राक्सी इत्यनया सह उपवेशनं विहितम्। आकाशवाण्या सह चर्चायां सर्वदलीयप्रतिनिधिमण्डलस्य सदस्यः पूर्वकेन्द्रीयमन्त्री एम.जे. अकबरः पाकिस्तानस्य आलोचनां कृतवान्। अवदत् यत् पाकिस्तानं निजास्तित्वम् उपस्थातुं सप्तचत्वारिंशोत्तर- ऊनविंशतितमवर्षात् राज्य-प्रायोजितातङ्कवादं प्रवर्धयति।

अद्य पनामादेशे सर्वदलीयप्रतिनिधिमण्डलस्य नेतृत्वं कुर्वन् काङ्ग्रेस-दलस्य सांसदः शशि-थरूरः आतङ्कवादविरुध्य भारतस्य दृढं दृष्टिकोणं पुनः स्पष्टी-कृतवान्। अमुनोक्तं यत् भारतं कस्यापि आतङ्कवादाक्रमणं न सहते आक्रमणस्य प्रतिक्रियां दास्यति इति।

-------------------------------------------------

भारतीय-रिजर्व-बैङ्कः

भारतीय-रिजर्व-बैङ्केन अद्य स्वीयं वार्षिकं प्रतिवेदनं प्रकाशितम्। रिजर्व-बैङ्केन ऐषमो वित्त-वर्षे भारतस्य तीव्रतया समेधमानार्थ-व्यवस्थाया: लक्ष्यं प्रवर्तितुं अनुमानं प्रकटितम् । विनिर्माणस्य निर्माणस्य च विस्तारः भविष्यति। येन वृत्तीनाम् अध्यर्थनायाम् वृद्धिः भविष्यति।

सममेव भारतीय-रिजर्व-बैंक: विनियमनं सरलीकर्तुं वित्तीयक्षेत्रं साइबर-सुरक्षां च समेधितुं योजनां निर्माति।

---------------------------------------------------

ऋतुसञ्चेतना

भारतर्तुविज्ञानविभागेन अद्य पूर्वोत्तर-राज्येषु, तटीय-दक्षिणान्तरिक-कर्नाटक-केरल-माहे, तमिलनाडु-पुडुचेरी, करैकल-इत्येतेषु एकान्त-स्थानेषु च अतिवृष्टेः पूर्वानुमानं कृतम्। आन्ध्रप्रदेशे, पूर्वमध्यप्रदेशे, जम्मू-कश्मीरे, लद्दाखे, बाल्टिस्ताने, मुजफ्फराबादे, पञ्जाबे, राजस्थाने, दिल्ल्यां च आगामिषु द्वि-त्रि दिवसेषु विद्युद्द्योतनेन तीव्रवात्या च सह वज्रपातस्य च सम्भावना दृश्यते, विभागेन अद्य पश्चिमराजस्थाने तापतरङ्गस्य, धूलीपूर्णस्य झंझावातस्य स्थितेः च सञ्चेतना प्रसारितास्ति।

---------------------------------------------------

बैडमिण्टन्

भारतस्य सात्विक-साईंराज-रङ्कि-रेड्डी, चिराग-शेट्टी इत्यनयोः दलम् अद्य सिङ्गापुर-ओपन्-बैडमिण्टन्-स्पर्धायाः पुरुषयुगल-वर्गस्यप्रागुपान्त्यचक्रे प्रविष्टम्। भारतीय-दलेन इन्डोनेशियादेशस्य शबर-कार्यमन-गुटामा, मोह-रजा पहलवी इस्फहानी इत्यनयोः दलम् ऊनविंशतिः एकविंशतिः एकविंशतिः षोडश, एकविंशतिः ऊनविंशतिः इत्यंकान्तरालेन पराजितम्।

---------------------------------------------------

क्रिकेट्

आई.पी.एल्. क्रिकेट्-प्रतिस्पर्धा-मालिकायाम् निर्णायक-चक्रे अर्हतायै प्रथम-स्पर्धायाम् अद्य रॉयल-चैलंजर्स-बैंगलूरु-दलस्य सामुख्यं पञ्जाब-किंग्स्-दलेन समम् भविष्यति। इयं स्पर्धा सायंकाले सार्धसप्तवादने भविष्यति।

।। इति वार्ता: ।।